गुरुः स्वाश्रितं शिष्यं वर्षमात्रं प्रतीक्षयेत् । वर्षैकेन भवेद्योग्यो विप्रोगुणसमन्वितः । वर्षद्वयेन राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः । चतुर्भिर्वत्सरैः शूद्रः कथिता शिष्ययोग्यता" तत्रैव "राज्ञि चामात्यजो दोषः पत्नी पापं स्वभर्त्तरि । तथा शिष्यार्जितं पापं गुरुः प्राप्नोति निश्चितम्" देव्यागमे शिववाक्यं "गुरुशय्यासनं यानं पादुकोपानहं पीठम् । स्नानोदकं तथा छायां लङ्घयेन्न कदाचन । गुरोरग्रे पृथक् पूजामौद्धत्यञ्च विवर्जयेत् । दीक्षां व्याख्यां प्रभुत्वञ्च गुरोरग्रे परित्यजेत्" ।

अथ निषिद्धशिष्याः अगस्त्यसंहितायामुक्ता यथा "अलसा मलिनाः क्लिष्टाः दाम्भिकाः कृपणास्तथा । दरिद्रा रोगिणो रुष्टा रागिणो भोगलालसाः । असूयामत्सरग्रस्ताः शठास्तथा परुषवादिनः । अन्यायोपार्जितधनाः परदाररताश्च ये । भ्रष्टव्रताश्च ये कष्टवृत्तयः पिशुनाः खलाः । बह्वाशिनः क्रूरचेष्टा दुरात्मानश्च निन्दिताः । इत्येवमादयोऽप्यन्ये पापिष्ठाः पुरुषाधमाः । एवंभूताः परित्यज्या शिष्यत्वेनोपकल्पिताः । पापिने क्रूरचेष्टाय कृपणाय तथैव च । दीनायाचारशून्याय मन्त्रद्वेषकराय च । निन्दकाय च मूर्खाय तीर्थद्वेषपराय च । भक्तिहीनाय देवेशि ! न देया मन्त्रकस्य च" "आचारे शासयेद्यस्तु स आचार्य उदाहृतः । य आचार्यपराधीनस्तद्वाक्यं धार्य्यते हृदि । शासने स्थिरवृत्तिश्च शिष्यः सद्भिरुदाहृतः । एवं लक्षणसंयुक्तं शिष्यं सद्गुणान्वितम् । अध्यापयेद्विधानेन मन्त्ररत्नमनुत्तमम्" पद्मपु०उ० २५अ० ।

**शि(सि)ह्ल** पु० सिह्–लक् नि० वस्य शो वा । (शिलारस) गन्धद्रव्यभेदे शब्दच० । स्वार्थे क । तत्रैव अमरः ।

**शी** शयने अदा०आत्म०अक० सेट् । शेते शेरते अशयिष्ट । शीङ् वर्त्तमाने क्त शयितः । शयित्वा ।

**शी** स्त्री शी-भावे क्विप् । १शयने २शान्तौ च शब्दर० ।

**शीक** सेके सर्पणे च भ्वा०आत्म० सक० सेट् । शीकते अशीकिष्ट । ऋदित् चङि न ह्रस्वः ।

**शीक** आमर्षे सेके च वा चु०उभ०पक्षे भ्वा०पर०सक० सेट् । शीकयति ते शीकति अशीशिकत्-त अशीकीत् ।

**शीकर** न० शीक-अरन् । १सरलद्रवे २वायौ पु० मेदि० । ३जलकणे अमरः ।

**शीघ्र** न० शिघि-रक् पृषो० । १विलम्बाभावे २त्वरिते च ३तद्वति त्रि० अमरः । ४दन्तीवृक्षे स्त्री राजनि० ।

**शीघ्रचेतन** पुंस्त्री० शीघ्रा चेतना यस्य । १कुक्कुरे शब्दमा० स्त्रियां ङीष् । २द्रुतचेतनायुते त्रि० ५ब० । ४अर्कवृक्षे पु० । ५अतिबलायां स्त्री राजनि० । [शब्दच० ।

**शीघ्रजन्मन्** पु०शीघ्रं जन्म यस्य । करञ्जभेदे (काँटाकरमचा)

**शीघ्रपुष्प** पु० शीघ्रं पुष्पं यस्य । वकवृक्षे राजनि० ।

**शीघ्रवेधिन्** पु० शीघ्रं विध्यति विध–णिनि । शीघ्रलक्ष्यवेधनकर्त्तरि हेमच० ।

**शीत** न०श्यै–क्त स्पर्शे सम्प्र० । १शीतले स्पर्शे २जले शब्दमा० ३हिमे च अमरः ४त्वचे राजनि० ५बहुवारवृक्षे ६वेतसवृक्षे च पु० अमरः । ७असनपर्ण्यां शब्दर० । ८पर्पटे ९निम्बे १०कर्पूरे राजनि० । ११हिमर्त्तौ च पु०१२शीतस्पर्शयुते त्रि० अमरः । १३अलसे त्रि० मेदि० । १४क्वथिते शब्दच० ।

**शीतक** पु०शीतमिव करोति कृ–ड । १दीर्घसूत्रिणि आलस्यहेतुना कार्य्याकरणाय शीतबाधामभिनीय २सुस्थिते मेदि० । शीत+स्वार्थे क । ३शीतपदार्थे ४शीतकाले मेदि० ५वृश्चिके शब्दमा० ६असनपर्ण्यां शब्दर० ।

**शीतकर** पु० शीतः शीतलः करो यस्य । १चन्द्रे २कर्पूरे च शीतकिरणादयोऽप्यत्र त्रि० । शीत करोति कृ–अच् । ३शीतकारके ।

**शीतकाल** पु०६त० । हिमर्त्तौ मार्गपौषमासद्वयात्मके काले

**शीतकुम्भ** पु० शीतं स्कुम्नाति स्कुम्भ–अच् नि० । १करवीरे रत्नमा० । २जलजवृक्षभेदे स्त्री राजनि० गौरा० ङीष् ।

**शीतकृच्छ्र** पु० "त्र्यहं शीतं पिबेत् तोयं त्र्यहं शीतं पयः पिबेत् । त्र्यहं शीतं घृतं पीत्वा वायुभक्षपरस्त्र्यहम्" यमोक्ते व्रते ।

**शीतक्षार** न० कर्म० । श्वेतटङ्कणे राजनि० ।

**शीतगन्ध** न०शीतः शीतलः गन्धो यस्य । श्वेतचन्दने राजनि०

**शीतगु** पु० शीता गावः किरणाः यस्य । १चन्द्रे २कर्पूरे च

**शीतचम्पक** पु०शीतश्चम्पक इव । १दर्पणे २प्रदीपे च मेदि०

**शीतपर्णी** स्त्री शीतं पर्णं यस्याः ङीप् । अर्कपर्णिकायां रत्नमा० ।

**शीतपल्लवा** स्त्री शीतः पल्लवो यस्याः । भूमिजम्ब्वां रत्नमा०

**शीतपाकिनी** स्त्री शीते पाकोऽस्त्यस्याः इनि ङीप् । काकोल्यां शब्दच० ।

**शीतपाकी** स्त्री शीतेन पाको यस्याः ङीप् । १वाट्यालके शब्दच० । २काकोल्यां राजनि० ।

**शीतपुष्प** पु० शीतं शीतवीर्य्यकरं पुष्पं यस्याः । १शिरीषवृक्षे